International Journal of Jyotish Research
(वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2017; 2(2): 07-09
© 2017 Jyotish
www.jyotishajournal.com
Received: 04-05-2017
Accepted: 06-06-2017

**डा. माताप्रसाद शर्मा**
एसोसियट प्रोफेसर, शिक्षाशास्त्रविभाग:,
श्री जगद् गरू रामानन्दाचार्य-
राजस्थान संस्कृत विश्वविद्यालय:,
जयपुरम् (राजस्थान)

**Correspondence**
**डा. माताप्रसाद शर्मा**
एसोसियट प्रोफेसर, शिक्षाशास्त्रविभाग:,
श्री जगद् गरू रामानन्दाचार्य-
राजस्थान संस्कृत विश्वविद्यालय:,
जयपुरम् (राजस्थान)

# समावेशात्मकशिक्षाया: सम्प्रत्यय:

**डा. माताप्रसाद शर्मा**

**प्रस्तावना**

विदितचरमेव समैरपि यदखिलेऽपि विरिञ्चि प्रपञ्चे ब्रह्मण: सर्वश्रेष्ठाकृतिर्मानव। आस्याश्च श्रेष्ठकृतेरूद्धारार्थं शिक्षाया: नितरामावश्यकता वर्तते एव। सा शिक्षा तादृशी स्यात् या मानवानां जीविकोपार्जने साहाय्यम् आचरेत्, तेषां बौद्धिकं विकासमापादयेत्, मानवं सुसंस्कृतं सुसभ्यं च विधाय तत्र सांस्कृतिकमुत्कर्षं सम्पादयेत्। मानवस्य जीवनस्य च सर्वाङ्गीणं विकासमापद्य पूर्णत्वं साधयेत्। चरित्रनिर्माणेन नैतिकताया विकासनं, स्वार्थपरता-उच्छृंखलतादि-प्रवृत्तीनां निरोधेन जीवनं सामाजिकं कुर्याद्, स्वावलम्बन-भावना विकसेत्, उत्तरदायित्वभावना प्रचरेत्, सर्वासु सम-विषमासु परिस्थितिषु कार्यसम्पादनक्षमता संजायेत।

शिक्षा अस्यां धरायां मानवविकासस्य परमं साधनम्। इयञ्च परमोपकारिणी शिक्षा न समेभ्य: बालेभ्य: प्रदीयमाना दृश्यते विशेषत: दिव्याङ्गेभ्य: अशक्तेभ्य: इति धिया शिक्षाविद्भि: 'समावेशात्मक-शिक्षाया:' आरम्भ: कृत:। समावेशात्मकशिक्षा सा शिक्षा वर्तते यस्या: मुख्योद्देश्यं छात्राणां संख्याभिवर्धनम् एवं तेभ्य: छात्रेभ्य: अवसर: देय: ये दिव्याङ्गा: एवं असमर्था: भवन्ति। अस्या: शिक्षाया: अयमर्थ: तादृश-नीतिनियमादीनां रचना विधातव्या येन अधिकाधिकछात्रेभ्य: शिक्षाप्राप्ति: स्यात्। समावेशात्मकशिक्षाया: परमोद्देश्यं सर्वेषां कृते शिक्षा। जाति-लिङ्ग-रङ्ग-धर्म-भेदभावरहिता सर्वेषां कृते शिक्षा। अस्या: शिक्षाया: इदमपि उद्देश्यं भवति यत् ये छात्रा: एच.आई.वी./एड्स, टी.वी. सदृशभयङ्करै: रोगै: ग्रसिता: पीडिताश्च सन्ति तेभ्योऽपि शिक्षालाभस्स्यात्। समावेशिशब्दस्य शाब्दिकोऽर्थोप्यमेव अस्ति यत् सर्वेषां समावेशनम् इति। समावेशिशब्द: आङ्गलभाषायां प्दबसनेपअम इति उच्यते। अयं शब्द: प्दबसनकम इस्यस्मात् शब्दात् निष्पन्न:। यस्यार्थ: समावेशनम् एव। सर्वेषां छात्राणां शिक्षाप्रक्रियायां समावेशनमेव एतदर्थ: इति सिद्ध्यति। एतत् सर्वं तदानीमेव सम्भवति यदा तादृशीशिक्षाव्यावस्थाया: निर्माणं स्यात्। यया सर्वविधबालकावश्यकतानां पूर्ति: सम्भूयात्, अधिगम-कर्तृमानसिकानुकूलञ्च स्यात्। एतस्या: उद्देश्यं तादृशसमाजरचनाविधानमस्ति यत्र सर्वेषां समत्वं स्यात् (समानाधिकाराणां समानाधिगमावसरलाभश्च स्यात् इति भाव:)। अयम् एक: प्रगतिशीलसमाजसंरचनाया: विशिष्ट: प्रयास: यत्र सर्वथा सर्वदा सर्वत्र च नैरन्तर्यं परिलक्ष्यते।

यूनेस्को अनुसारेण समावेशात्मकशिक्षाया: इयं परिभाषा-

Inclusive education should be viewed in terms of including traditionally excluded or marginalized groups or making the invisible visible. The most marginalized groups are often invisible in society: disabled children, girls, children in remote villages and the very poor. These invisible groups are excluded from governmented policy and access to education.

1994 तमे संवत्सरे स्पेन देशस्य सलमानकानमाकस्थले एतच्छिक्षा-सम्बन्धितं सम्मेलनमभवत् तत्र च इयं परिभाषा प्रदत्ता-

Inclusive education means that:
"Schools should accommodate all children regardless of their physical, intellectual, social,

emotional, linguistic or other conditions. This should include disabled and gifted children, street and working children, children from remote or nomadic populations, children from Linguistic, ethnic or cultural minorities and children from other disadvantaged or marginalised areas or groups". (The salamancas statement and framework for action on special needs education Para 3) (Salamanca, Spain, 7-70 June 1994)

**अयं भाव :**

ये छात्राः येभ्यः विशिष्टशैक्षिकावश्यकतानामपेक्षा अस्ति तेभ्यः अपि शिक्षाप्राप्तेः धिकारः अस्ति, यावान् सामान्यछात्रेभ्यः। अपि च एतदर्थं तादृशाः प्रयाशा: करणीयाः यत् विशिष्टशैक्षिकावश्कतायुताः छात्राः अपि सामान्यछात्रैः सह सामान्यविद्यालयेषु अध्ययनं कर्तुं पारयेयुः। शिक्षाप्रक्रियायाञ्च भाग्रहणं कृत्वा स्वजीवनावश्यकतानां पूर्तिं च कर्तुं शक्नयुः।

अन्ते निष्कर्षत्वेन वक्तुं शक्यते यत् इयं शिक्षाप्रक्रिया अस्माकं वैदिकीभावनाम् आलक्ष्यैव विनिर्मिता विक्षैः।

**तद्धिः**

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग्भवेत्।।**
**अपि च–**
**समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति।।** (ऋग. 10.191.2.4)
**सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।**

इत्यादि श्लोकमन्त्राः सघोषं कथयन्ति यत् सर्वेऽपि सुशिक्षिताः स्युः। समेऽपि सुखिनः स्वस्थाश्च सन्तः परस्परं भद्रतया पश्येयुः तथा च सुखपूर्वकं जीवनयात्रां सम्पादयेयुः इति वैदिकीभावना।

1. **समावेशात्मकशिक्षायाः सिद्धान्ताः–**
   सकललजनाय शिक्षा – समावेशात्मकशिक्षा समाजस्य कस्यचिद् एकस्य वर्गस्य कृते नास्ति अपितु सर्वेषां कृते। सर्वजनहिताय सर्वजनसुखाय अस्याः मुख्योद्देश्यम्।
2. **दिव्याङ्गाः समाजस्य महत्वपूर्णाङ्गम्–**
   अस्याः प्रणाल्याः मुख्योद्देश्यमस्ति दिव्याङ्गानां समाजस्य मुख्यधारायामानयनम्, तेषां सर्वाङ्गीणविकासकरणञ्च।
3. **अधिकाररक्षा–**
   शिक्षायाः अधिकारः मूलभूताधिकारेषु अन्यतमः। यदि लोकतन्त्रात्मकेऽस्मिन् देशे सर्वाः व्यक्तयः समानाश्चेत् तासां शिक्षाग्रहणाधिकारोऽपि समानः स्यात् इति भावः।
4. **संवैधानिकोत्तरदायित्वानां निर्वहणम्–**
   भारतीयसंविधानस्य विभिन्नासु धारासु अनेकैः संशोधनैश्च भारतीयनागरिकेभ्यः शिक्षायाः अधिकारः नैकप्रकारेण प्रतिपादितः। तदित्थं–

1) दिव्याङ्गबालेभ्यः समन्वितशिक्षायोजना, 1974।
2) शिक्षायाः सार्वभौमिकत्वनिर्माणाय DPEP कार्यक्रमः, 1985।
3) राष्ट्रियशिक्षानीतिः, 1986
4) सर्वशिक्षाभियानम्, 2002
5) समावेशिशिक्षानिमित्तं बृहतीक्रियात्मिकायोजना, 21st March, 2005.

समावेशिशिक्षा सशक्तरूपेण एतदेव स्पष्टयति यत् न कोऽपि दिव्याङ्गः कथमपि अशिक्षितः स्याद् इति। एवं रूपेण इयं शिक्षाप्रणाली संविधानस्य उत्तरदायित्वं निर्वहति।

**5. सामाजिकचेतनायाः उद्गमः–**

अयं तु सार्वजनीनः अनुभवो यत् शिक्षया व्यक्तित्वविकासः सञ्जायत इति। व्यक्तित्वविकासेन सह शिक्षया सामाजिक-चेतनाया विकासोऽपि भवतीति शिक्षाविदः। अधिकाराणां रक्षायाः चेतना, भातृभावस्य समतायाश्चचेतना, बालानां पालनपोषणयोः, चेतना, तेषां शिक्षायाः प्रदानस्य च चेतना, बालानां शारीरिक-मानसिक-सामर्थ्यानां क्षमतानाञ्च विषये चेतना एवं दिव्याङ्गानां प्रति सकारात्मकदृष्टिकोणस्य च विकासः शिक्षामाध्यमेन एवं भवितुम् अर्हति। भारतदेशे अनेके संरक्षकाः अभिभावकाः एतया चेतनया (सामाजिकचेतनया) अनभिज्ञाः सन्ति इति हेतोः समावेशिनी इयं शिक्षा आन्दोलनरूपेण समाजे चेतनातामानेतुं उत्तरदायित्वं निर्वहति।

**6. शिक्षायां गुणवत्तानयनम्–**

शिक्षायां गुणवत्तासम्पादनमधोलिखितिबिन्दुषु आश्रितो भवति–

**1)** आवश्यकताधारितशिक्षा
**2)** पाठ्यचर्यायां नमनीयता
**3)** अधिगमप्रक्रियायामधिगन्तृणां सक्रियभावग्रहणम्।

**7. कौशलप्रत्यभिज्ञानम्–**

सर्वोऽपि बालकः न्यूनान्न्यूनम् एकेन विशिष्टगुणेनयुतः अवश्यं भवति। आवश्यकता तत्र केवलं तस्य कौशलाभिज्ञानस्यैव भवति। यदि कस्यचिद्बालकस्य रूचिक्षेत्रं विज्ञायते एवं तत्रैव यत्नः क्रियते चेत् दिव्याङ्गोऽपि बालः बहून्नतिं कर्तुमर्हति।

**8. भ्रातृभावनायाः विकासः–**

बालकेषु सहकारितायाः, सामाजिकसकारात्मकान्तः क्रियायाः, सहयोगस्य परानुभूतेः, परस्परविश्वासमैत्री-भावनादीनां विकासकरणं समावेशिशिक्षायाः मूलोद्देश्येषु अन्तर्भवति। एतादृश्यः भावना समाजिकसमरसतावर्धने सहायिकाः भवन्तिः।

समावेशिशिक्षा असमानतायाः खण्डनं कृत्वा भ्रातृभावनं विकासयति, 'सर्वेषाञ्च कृते शिक्षा' इति ध्येयवाक्यम्पूरयति।

**9. आत्मविश्वासात्मसम्मानयोः विकासः–**

शिक्षाकारणेन मानवस्य आत्मविश्वासो वर्धते। आत्मविश्वासमवाप्य मानवः आत्मसम्मानाय यतते। तत्प्राप्तिश्च शिक्षाधीनैव। आत्मविश्वासप्राप्तिः समावेशात्मकशिक्षायाः प्रमुखोद्देश्येषु अन्यतमा।

**समावेशात्मकशिक्षायाः वैशिष्ट्यम्**

**समावेशात्मकशिक्षायाः वैशिष्ट्यानि अधोलिखितानि भवन्ति**

**1)** समावेशात्मकाशिक्षा तादृशी शिक्षा अस्ति यत्र दिव्याङ्गबालकः सामान्यबालकश्च सहैव सामान्यकक्षायां अधिगमाप्नुतः।

दिव्याङ्गबालेभ्यः अधिका सहायता प्रदीयते। एवं रूपेण समावेशात्मकशिक्षा समत्वदानस्य समर्थनं करोति।

2) एतस्याः शिक्षायाः तादृशः प्रारूपो वर्तते यन्माध्यमेन दिव्याङ्गबालोऽपि शिक्षां सम्प्राप्य समाजे समुचितं स्थानम् आप्नोति।
3) एतस्यां शिक्षायां दिव्याङ्गानां बालानां न्यूनं प्रतिबन्धकत्वं भवति, वातावरणञ्च अधिकप्रभावपूर्णं भवति। एतेन दिव्याङ्गबालाः सामान्यबालकवत् जीवनयापनं कुर्वन्ति।
4) इयं शिक्षा 'सर्वे भवन्तु सुखिनः' इति आर्ष वाक्यस्योपरि बलं ददाति। 'सर्वजनहिताय, सर्वजनसुखाय' इति ध्येयमपि पूरयति।
5) अस्यां शिक्षाप्रक्रियायां दिव्याङ्गबालाः अपि तावन्तः एव महत्त्वपूर्णाः भवन्ति यावन्तः सामन्याः बालकाः।
6) दिव्याङ्गबालानाम् उच्चजीवनयापनाय इयं शिक्षा बलं ददाति।
7) समावेशात्मकशिक्षा अध्यापकानां शिक्षाविदाम् अभिभावकानाञ्च सामूहिकप्रयासानामुपरि आधारिता अस्ति।

**समावेशात्मकशिक्षायाः लाभाः–**

समावेशात्मकशिक्षायाः निम्नलिखिताः लाभाः सन्ति–

1. **पठनलेखनयोः सहायतां प्रददातिः** – समावेशात्मकशिक्षायाः अयं माध्यमः पूर्णरूपेण लाभकारी भवति। एतेन बालकाः अधिगच्छन्ति यत् पठने लेखने च परस्पर-सहायता कथं करणीया इति।
2. **नमनीयः पाठ्यक्रमः–** समावेशात्मकशिक्षायापद्धतौ बालानां विविधावश्यकतानां पूर्तये पाठ्यचर्या नमनीया भवति। एतेन कक्षायाः वातावरणम् इतोऽपि सकारात्मकं स्वाभाविकम् अनुज्ञानात्मकं च भवति यच्च बालकशिक्षकाभिभावकेभ्यः समेभ्यः उपयोगि भवति।
3. **दिव्याङ्गानां जीवनोत्थानाय यत्नः–** समावेशात्मकशिक्षा दिव्याङ्गानाम् अधिगमाय शोधं कर्तुं अध्यापकान् प्रेरयति। ते चाध्यापकाः सुखपूर्वकाधिगमदानाय यतन्ते। एतादृशरीत्या दिव्याङ्गा शिक्षामवाप्य स्वजीवनोत्थानाय यतन्ते।
4. समावेशात्मकशिक्षाप्रणाली आवश्यकतानामुपरि आधारित भवति। आवश्यकतानुसारमेव शिक्षणविधयः उपयुज्यन्ते।
5. समावेशात्मकाशिक्षणप्रणाली अधिगन्तृषु सामाजिकगुणानां पोषणं करोति।
6. समावेशिशिक्षा बालानां व्यक्तिगतविकासाय तथा तेषाम् उच्चशैक्षिकास्थितिप्रदानाय उपयोगिनी वर्तते। सब्रह्मचारिभिः अधिगमः, परियोजनासु सहैव कार्यकरणम् सामूहिकरूपेण वार्ता, विचारविमर्शयन्तरम् अधिगमः समस्यानां समाधानम् इत्यादिकं बालानाम् उपयोगाय भवति।

अन्ते इदमेव वदामि यत् साम्प्रतिकसमाजे सर्वजनहिमाय सर्वजनसुखाय सुव्यवस्थितसमतामूलकसमाजस्य निर्माणाय इयं समावेशात्मकशिक्षा परमावश्यकी इति।

## संदर्भ ग्रन्थ सूची

1. Fundamentals of Inclusive Education - Jswantvirak, Alka Arora, Richa Sharma Sood
2. Special Educational Needs and the Internet : ISSUES For the inclusive classroom- ctric Abbott
3. Inclusive Education for Special Children - Sushil kumar Goel
4. The Salamanca Statement and Framework for Action on Special Needs Education
5. Constitution of India
6. गुप्ता, एस.पी. अनुसन्धान सन्दर्भिका, शारदा पुस्तक भवन, इलाहाबाद, 2013
7. डा. ए.बी. भटनागर, समावेशी शिक्षा, आर लाल बुक डिपो, मेरठ, 2016-17
8. सिंह मदन - समावेशीशिक्षा- आर.एल. बुक डिपो मेरठ, सन् 2014
9. शिक्षा मनोविज्ञानम् - पी.डी. पाठक
10. संस्कृतनिबन्धशतकम् - श्री कपिल द्विवेदी
11. Internet